# बिल्व स्तोत्रं

## bilva stotraṁ

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रियायुधं

त्रिजन्मपापसंहारं एकबिल्वं शिवार्पणम् ॥

tridalaṁ triguṇākāraṁ trinetraṁ ca triyāyudhaṁ
trijanmapāpasaṁhāram ekabilvaṁ śivārpaṇam ||

त्रिशाखैः बिल्वपत्रैश्च अच्छिद्रैः कोमलैः शुभैः

तवपूजां करिष्यामि एकबिल्वं शिवार्पणम् ॥

triśākhaiḥ bilvapatraiśca acchidraiḥ komalaiḥ śubhaiḥ
tavapūjāṁ kariṣyāmi ekabilvaṁ śivārpaṇam ||

कोटिकन्या महादानं तिलपर्वत कोटयः

कान्चनं शैलदानेन एकबिल्वं शिवार्पणम् ॥

koṭikanyā mahādānaṁ tilaparvata koṭayaḥ
kāncanaṁ śailadānena ekabilvaṁ śivārpaṇam ||

काशीक्षेत्र निवासं च कालभैरव दर्शनम्

प्रयागे माधवं दृष्ट्वा एकबिल्वं शिवार्पणम् ॥

kāśīkṣetra nivāsaṁ ca kālabhairava darśanam
prayāge mādhavaṁ dṛṣṭvā ekabilvaṁ śivārpaṇam ||

इन्दुवारे व्रतं स्थित्वा निराहारो महेश्वरः

नक्तम् हौष्यामि देवेश एकबिल्वं शिवार्पणम् ॥

induvāre vrataṁ sthitvā nirāhāro maheśvaraḥ
naktam hauṣyāmi deveśa ekabilvaṁ śivārpaṇam ||

रामलिङ्ग प्रतिष्ठा च वैवाहिक कृतं तथा

तटाकादि च सन्तानं एकबिल्वं शिवार्पणम् ॥

rāmaliṅga pratiṣṭhā ca vaivāhika kṛtaṁ tathā
taṭākādi ca santānam ekabilvaṁ śivārpaṇam ||

अखण्ड बिल्व पत्रं च आयुतं शिव पूजनं

कृतं नाम सहस्रेण एकबिल्वं शिवार्पणम् ॥

akhaṇḍa bilva patraṁ ca āayutaṁ śiva pūjanaṁ
kṛtaṁ nāma sahasreṇa ekabilvaṁ śivārpaṇam ||

उमया सहदेवेश नन्दिवाहनमेव च

भस्मलेपन सर्वांगं एकबिल्वं शिवार्पणम् ॥

umayā sahadeveśa nandivāhanameva ca
bhasmalepana sarvāṅgam ekabilvaṁ śivārpaṇam ||

सालग्रामेषु विप्राणां तटाकं दशकूपयोः

यज्ञकोटि सहस्रश्च एकबिल्वं शिवार्पणम् ॥

sālagrāmeṣu viprāṇāṁ taṭākaṁ daśakūpayoḥ
yajñakoṭi sahasraśca ekabilvaṁ śivārpaṇam ||

दन्तिकोटि सहस्रेषु अश्वमेध शतक्रतौ

कोटिकन्या महादानं एकबिल्वं शिवार्पणम् ॥

dantikoṭi sahasreṣu aśvamedha śatakratau
koṭikanyā mahādānam ekabilvaṁ śivārpaṇam ||

बिल्वानां दर्शनं पुण्यं स्पर्शनं पाप नाशनं

अघ़ोर पाप संहारं एकबिल्वं शिवार्पणम् ॥

bilvānāṁ darśanaṁ puṇyaṁ sparśanaṁ pāpa nāśanaṁ
aġhora pāpa saṁhāram ekabilvaṁ śivārpaṇam ||

सहस्रवेद पाठेषु ब्रह्मस्थापन मुच्यते

अनेक व्रत कोटीनाम् एकबिल्वं शिवार्पणम् ॥

sahasraveda pāṭheṣu brahmasthāpana mucyate
aneka vrata koṭīnām ekabilvaṁ śivārpaṇam ||

अन्नदान सहस्रेषु सहस्रोपनयनं तथा

अनेक जन्म पापानि एकबिल्वं शिवार्पणम् ॥

annadāna sahasreṣu sahasropanayanaṁ tathā
aneka janma pāpāni ekabilvaṁ śivārpaṇam ||

बिल्वस्तोत्रमिदं पुण्यं यः पठेत् शिव सन्निधौ

शिवलोकमवाप्नोति एकबिल्वं शिवार्पणम् ॥

bilvastotramidaṁ puṇyaṁ yaḥ paṭhet śiva sannidhau
śivalokamavāpnoti ekabilvaṁ śivārpaṇam ||